CC-0. In Public Domain. Digitization by eGangotri

सा-२८९३

दर्श-राघव

पुष्पाञ्जलिः

लेखकः—

सोमनाथ शर्मा.

२००९.

मूल्यममूल्यं प्रेम.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा
२८८२

श्रीरामचन्द्रं शरणं प्रपद्ये

श्रीरामपादपाथोजमकरन्दकरम्बितः ।

विजयन्ते कामबुधा जयन्ति मन्तो रजःकणाः ॥१॥

गायन्ति छन्दसो लोकमवतीर्णा मनोहराः ।

प्राचेतस्यः पुरावाचो यदीयं गुणगौरवम् ॥२॥

काण्डत्रितयसन्दृब्धत्रिंशत्स्तवककल्पितः ।

पुष्पाञ्जलिरयं भक्त्या श्रीरामाय समर्प्यते ॥३॥

प्रवर्तिता येन वाचः पराचीनाः प्रपत्तये ।

प्रत्यक्तत्त्वस्य तस्यैव भवन्त्वेताः प्रसत्तये ॥४॥

पुष्पाञ्जलिर्नीरसोपि हार्दभक्तिरसाप्लुतः ।

कल्पतां जगदीशस्य सुचिरं चरणार्चने ॥५॥

निवेदयिता--

प्रपन्नः सोमनाथ शर्मा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीमत्सु.....

.....

श्रीरामपादुकापीठसपर्यापरिकल्पितः ।
पुष्पाञ्जलिः सविनयं करयुग्मे समर्प्यते ॥१॥

क्षणमप्यार्यदृक्पातप्रसादरससेचनम् ।
अभ्यर्घ्यते श्रद्धयाऽस्य शुद्धयेऽथ समृद्धये ॥२॥

विनम्रेण—

वि० सं० २००९ ।
ठमेल, नैपाल ।

सोमनाथ शर्मणा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आध्यात्मिक-काण्डे

(१) उद्गीतिस्तवकः

जयति नियतिलीला-साक्षिभावाभिरामः,
सुकृतिसमिति-गीताशेषभावोपरामः ।
प्रकृतिविकृतिरूप-द्वैतसंस्थाविरामः,
प्रणतिविततिभूमिः श्रेयसां धाम रामः ॥१॥

जयति वियति सृप्ता यस्य शाखाः प्रशाखा
दधति नियतिवृष्टैः क्षीरनीरैर्जगन्ति ।
विरतिविकृतिवर्जं सत्फलैः कामपूरः,
सुमतिविमतिशून्यः सोयमानन्दकन्दः ॥२॥

जयति सततशून्य-क्लेशकर्माशयस्य
प्रथितविततशक्तेः प्रत्नयोगेश्वरस्य ।
जगदवनविनोदोपात्त-निर्माणकाये,
विशदहृदयवेद्या विश्ववन्द्या विभूतिः ॥३॥

जयति तिमिरमूलोन्मूलनोन्मीलितश्री-
स्त्रिभुवनभवनान्तर्दीपिका-सुप्रतिष्ठः ।
मधुमधुरसुगन्धस्नेहधारानुबन्धी
पवनविजयदीप्तो दिव्यदीप्तिः प्रदीपः ॥४॥

जयति गतरजस्के मानसे मोदमानः,
प्रसुमरविमलश्रीरन्तराकाशचारी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवशवलित-नीरक्षीरभेदे पटीयान्
द्विजकुलमहनीयः प्रोज्ज्वलो राजहंसः ।।५।।

जयति कलितलीलः प्रोज्ज्वलाभिः कलाभिः
प्रियतमसहचारी चारुचिच्चन्द्रिकायाः ।
अमृतरसपृषद्भिर्विष्वगाप्लाव्य विष्णोः
पदमुदयमहिम्नोन्मीलयन्नात्मचन्द्रः ।।६।।

जयति निभृतमन्तःकोशवेश्म प्रदीप्य
विवृतकरणरन्ध्रैर्विष्वगंशूत्प्रसार्य ।
तिमिरभरमुदस्य ख्यापयत्स्वामभिख्यां
हृदयपिटकगूढं कामदं रामरत्नम् ।।७।।

जयति यतिभिरन्तः सप्त भूमीरतीत्य,
वितमसि विरजस्के व्योम्नि भूम्ना विभाव्यः ।
ऋतममृतमशोकं निर्विकल्पं तुरीयं,
पदमधिशयितोऽयं सच्चिदानन्ददेवः ।।८।।

जयति स परमात्मा सर्वभूतान्तरात्मा
भवभवबहुभावाक्षेपविक्षेपशून्यः ।
शमदमपरिकर्माधूर्मिधैर्यान्तरङ्गा,
यमनियमसमृद्धा यत्र नित्यं रमन्ते ।।९।।

जयति परचिदात्माऽध्यात्ममानन्दरूपः
सदवधिरधिदैवं देवदेवस्वरूपः ।
गुणनिधिरधिभूतं मायया विश्वरूपः
प्रभुरयमभिरूपो रामनामानुरूपः ।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२) आम्नानस्तवकः

ऊर्ध्वं मूलं यस्य शाखा अवाच्यो
विश्वद्रीच्यश्चित्रिताः पुष्पपत्रैः ।
अश्वत्थेस्मिन्कोटरे चाकशीति
नाम्ना रामः पूर्णकामः सुपर्णः ॥१॥

क्लृप्तावासौ भूरुहे पञ्चशाखे
रामो मारश्चासवर्णौ सुपर्णौ ।
श्रेयः पूर्वो वर्षतीहोन्मुखेषु
प्रेयः कीटोच्छिष्टमप्यश्नुतेऽन्यः ॥२॥

उद्धाट्यैतान्पञ्चकोशान्सयत्नं
ज्योतिष्मत्या प्रज्ञयाऽन्तर्विशन्तः ।
धाम्ना भूम्ना रोचमानं गुहायां
दिव्यं प्रत्नं रत्नमासादयन्ति ॥३॥

प्रेयः श्रेयो वर्त्मनी प्राक्पराची,
प्रायः प्रेयो निर्विमर्शा वृणन्ति ।
प्रेयो हित्वा श्रेयसेऽन्तर्मुखानां
नेदिष्ठं तत्सत्यधामाभिरामम् ॥४॥

इष्टापूर्ते ज्ञानचर्या तपांसि
वित्ते यस्मिन्वेदयन्ति प्रतिष्ठाम् ।
ॐङ्कारोऽस्य प्राच्यगीतेरुपज्ञा
तत्सत्कारो ब्रह्मनिष्ठा वरिष्ठा ॥५॥

श्रौतान्स्मार्तानध्वनः पारयन्तो
नावर्तन्ते प्राप्य यत्पूर्णकामाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यैः सूक्तैर्गीयमानं तदेकं
ज्ञेयं ध्येयं कामदं रामधाम ॥६॥

ऋज्व्यो वक्राः स्यन्दमानाः स्रवन्त्यो
नावर्तन्ते प्राप्य वारांनिधानम् ।
एवं साङ्ख्यं कर्मयोगः प्रपत्तिः
सर्वाश्चर्याः पर्यवस्यन्ति तत्र ॥७॥

नीहारेण प्रावृता देवयानाः
क्षुद्राः कामा अन्तरा चान्तरायाः ।
अस्योपास्तेरन्वगाविर्भवन्ति
दिव्या लोका नीरजस्का विशोकाः ॥८॥

आर्ष ज्योतिर्गह्वरेऽन्तः प्रदीप्य
दैवीं वाचं प्रब्रुवाणाः पुराणाः ।
व्याचक्रुर्यं मुञ्जगर्भादिषीकां
देवः सोऽयं श्रेयसाऽस्मान्धिनोतु ॥९॥

अन्तर्ह्रत्तेज्योतिषः सामिधेन्यो
भूयो भूम्नां पाप्मनां पावमान्यः ।
व्यक्ताव्यक्तं सञ्चरिष्णोः प्रतीचः
सत्या नित्या गीतयः शुन्धयन्तु ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(३) प्रत्यक्तत्त्वस्तवकः—

यस्मिन्मायावर्णकैः स्वानुरूपं
दृश्यं श्रव्यं कल्पितं नामरूपम् ।
ध्येयं ज्ञेयं नित्यसत्यस्वरूपं
प्रत्यक्तत्त्वं भाति तद्रामरूपम् ॥१॥

देही गेही लोकनेता विजेता
प्रेमी स्वामी कल्प्यतां नाम मुग्धैः ।
आत्मारामा निर्विकल्पे समाधौ
पश्यन्त्यन्तः सच्चिदात्मानमेतम् ॥२॥

विज्ञंमन्यः को नु जानाति रामं,
मूढंमन्यः कोपि जानातु कामम् ।
वाग्मी नालं साधु निर्वक्तुमेतं,
मौनारूढः संविदा सूचयेत्तम् ॥३॥

प्रेक्षाऽन्वीक्षा जल्पना कल्पना वा
मुग्धा स्तब्धा निर्विशेषे परस्मिन् ।
या संवित्तिर्मन्यते सा न वित्तिः,
सा संवित्तिः सर्वथा या त्ववित्तिः ॥४॥

तत्रैवान्धाऽधिष्ठिता येन दृष्टिः,
श्रोत्रं वन्ध्यं तत्र, येनास्य पुष्टिः ।
वाणी द्रब्धा तेन, तत्रैव मुग्धा,
चेतो रूढं तेन, तत्रैव मूढम् ॥५॥

अन्तर्यामी प्रेक्षतेऽक्षैर्गवाक्षै-
र्नैवेक्षन्ते तं तमःसंवृताक्षाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्वग्भूयो भासमानोऽपि भास्वा-
न्नैवालोक्यो दैवदग्धैर्दिवान्धैः ॥६॥

कूटस्थोऽसावद्वयः प्रत्यगात्मा
द्वेधा मूर्तामूर्तसंस्थाद्वयेन ।
त्रेधाप्यध्यात्माधिदेवाधिभूत-
भावैर्भूयो भावुकैर्भाव्यतेऽन्तः ॥७॥

अन्तस्तन्त्रीर्घट्टयन्मारुतेन
श्रृण्वन्भूयोऽनाहतं मन्द्रनादम् ।
मध्ये प्रेमोदन्वतः प्रत्यगात्मा
संवित्पीठं रोचमानोऽधिशेते ॥८॥

तापव्याप्तेऽप्यन्तरङ्गे विमृष्टः
श्रेयो वर्षत्यन्तरात्मा प्रसन्नः ।
भीष्मग्रीष्मप्लुष्टशीर्णोऽपि शीताः
प्रालेयाद्रेर्निर्झराः प्रस्रवन्ति ॥९॥

काष्ठा सेयं नः परावृत्तवृत्ते-
र्निष्ठा चेयं निश्चलावृत्तभक्तेः ।
कक्षा सेयं चेतसः संप्रसत्ते-
र्दीक्षा चेयं श्रेयसः संप्रपत्तेः ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(४) परमात्मस्तवकः

कादम्बिनीव गगनं परिवीय मायाऽ-
मेयाऽ वभासयति यद्बहिश्चि विश्वरूपम् ।
तन्निर्विकल्पकमचिन्त्यमनाद्यनन्तं,
ब्रह्माद्वितीयमिदमात्मतयाऽऽमनन्ति ॥१॥

प्रातीतिकं किमपि भूतभवद्भविष्य-
द्यत्सम्भवं यदनितं यदनु प्रलीनम् ।
ब्रह्माण्डबुद्बुदसहस्रविलाससिन्धुः
सोयं महापुरुष इत्यनुपप्लवा वाक् ॥२॥

आभासयन्ति बहिरद्भुतभूतसर्गं
श्वासानुसारतरलानि पराञ्चि खानि ।
अन्तर्निरोधपरिवर्तितबाह्यवृत्तिः
प्रत्यग्दृगेव विविनक्ति तदात्मतत्त्वम् ॥३॥

उन्मीलयन्ति बलवद्बहिरिन्द्रियाणि
तावद्विकल्पविषमा विषया अशेषाः ।
यावन्न भाति परिकर्मविमृष्टदृष्ट्या-
ऽधिष्ठानतत्त्वमिदमान्तरपीठिकायाम् ॥४॥

छायावदात्मकृतमद्भुतभूतरूपं
मायाऽवभास्य ननु भीषयते तदज्ञम् ।
जाते विवेकविमले परितः प्रकाशे
तस्या लयात्स्फुरति वास्तवबिम्बमेव ॥५॥

स्थायिन्यशेषविषयाऽप्युपलब्धिसम्प-
त्पर्येषणाऽप्यविरतं फलिनी स्वतन्त्रा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्तिः कृतेरविहताऽनवधिश्च भूयः
सत्यापयन्ति परमं प्रगुणा गुणास्तम् ॥६॥

अग्न्यम्भसी भुवि, तथा दिवि सूर्यसोमा-
वोजःशमाविह महात्मनि सुप्रतिष्ठौ ।
भूयो यथार्हमनयोरुदयोऽभिरूपः
कामं विशोषयति विष्वगुनत्ति विश्वम् ॥७॥

रामः प्रतीकमुदितं परमस्य पुंसः,
सीता मता प्रतिकृतिः प्रकृतेः परायाः ।
योगेऽनयोरुदयते सुभगोपभोगः,
कैवल्यवेदनमुदेति मिथो वियोगे ॥८॥

भोगापवर्गयुगधूर्वहधाम रागः
सीताऽनयोर्द्वितयमात्मनि भावनीयम् ।
प्राणो रयिर्यदि तु तौ भवभावहेतू,
वोधो मतिर्यदि मतौ परपारसेतू ॥९॥

उद्गत्वरैर्द्विजकुलैः परिशील्यमानं
विष्णोः पदं प्रगुणयत्यभिरामचन्द्रः ।
यस्मान्निसर्गशिशिरा अमृतस्य धाराः
संसारतापहतनिर्वृतये स्रवन्ति ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(५) विश्वपुरुषस्तवकः

सच्चिद्ब्रह्म विनिर्दिशत्युपनिषद्योगः परं पूरुषं,
मीमांसा विविनक्ति कर्मफलदं, तर्कः स्वतन्त्रेश्वरम्।
ईशानं निगमागमाश्च यममी सत्यापयन्ति प्रभुं,
तं सर्वोद्गमधाम विश्वपुरुषं रामात्मकं भावये ॥१॥

सूर्याचन्द्रमसौ दृशौ, घनघटाः केशास्त्रयो मस्तकं,
तारा हीरकमालिका, दश दिशो दोष्णः पदे रोदसी।
प्रत्यक्षं परिकल्प्य संयमधनैर्ध्येयस्य विश्वात्मनः
संक्षिप्तां प्रतिमामिमां प्रियतमा जानामि रामात्मिकाम् ॥२॥

यं दूरादवभासयन्ति निगमा, वाचंयमाः केचन,
स्वच्छन्दं कथयन्ति कल्पनकलाकल्पाः परे वाग्मिनः।
पश्यन्त्यन्तरुपास्यविश्वपुरुषं प्रज्ञादृशा योगिन-
स्तस्यैवास्य विभूतिधाम विमलं रामाभिधं भावये ॥३॥

शब्दा अङ्कुरयन्ति केवलममुं, सिञ्चन्ति धीवृत्तयो,
यागाः पल्लवयन्ति, योगविधयः प्रोल्लासयन्त्यन्ततः।
प्रेमस्थेमपरानुरक्तिसहभूभावोदयो दोहदः
कुर्याद्विश्वजनीनमीप्सितफलैरानन्दकन्दं परम् ॥४॥

भूयस्यः प्रतिभान्ति विश्वपुरुषे धाराधरे वैद्युत-
ज्योतींषीव विभूतयः कृतधियां निध्यानशुद्धाध्वनि।
ताः सच्चित्सुखशान्तिशक्तिकरुणालोकोज्ज्वलाः सम्पदः
सम्भूय प्रतिभासयन्ति जटिलज्योतिर्घनं राघवम् ॥५॥

सात्विक्यः प्रियकीर्तयः प्रणयिनामानन्दकन्दाङ्कुरा,
राजस्यो गतयः प्रपञ्चरचनावैचित्र्यचित्रायिताः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तामस्यः स्थितयश्च यस्य हृदयव्यामोहनाः स प्रभु-
र्निस्त्रैगुण्यपदोऽपि विश्वविदितस्त्रैगुण्यलीलानटः ॥६॥

यस्योन्मेषनिमेषयोरुदयतस्त्रैलोक्यसर्गक्षयौ,
यं सर्वे निगमागमा गमयितुं मन्दाक्षमन्दाक्षराः ।
तस्याचिन्त्यविभूतिवैभवभृतो विश्वात्मनस्तेजसो
मन्ये दृग्विषयं प्रतीकमुदितं रामाभिधानं महः ॥७॥

तैलाम्भःस्फटिकादिषु प्रतिफलन्नानाविधोपाधिषु
विम्बं व्योममणेर्विभज्य भजति स्थानानुरूपां रुचिम् ।
तद्वद्विश्वमहामणेः प्रगुणिते सर्वातिशायिश्रियाऽऽ-
दर्शेऽस्मिन्प्रतिविम्बिता प्रतिकृतिर्निर्धार्यते भावुकैः ॥८॥

यस्मिन्वास्तवनामरूपरहिते संविन्मये वस्तुनि
रूपग्राहिकया न वाङ्मनसयोः कायस्य वा सङ्गतिः ।
लोकालोकसहस्रविश्रुतमिदं रामादिनामोज्ज्वलं
सत्यं धाम विभूष्य विश्वमखिलं वर्वर्ति सर्वोपरि ॥९॥

प्रज्ञा यत्र ऋतम्भरा प्रभवति, श्रेयो न यस्मात्परं,
यः प्रत्यग्दृशमेषणात्रयमुचामप्यन्तराकर्षति ।
विश्वाधारममेयमादिपुरुषं, भूत्यै परान्दर्शिनां
रामाकारममुं वदन्ति कृतिनः सत्यं शिवं सुन्दरम् ॥१०॥

——:०:——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) नामस्तवकः

ॐङ्कारः शान्तिसूक्तेः, सकलकलिमलक्षालने कर्मकारः,
फुङ्कारः कल्मषाणां, भवजलधिसमुत्तारणे कर्णधारः।
भृङ्कारः सद्रसस्य, प्रियसुखसदनोपक्रमे सूत्रधारः,
श्रृङ्कारः पुण्यभूमेर्जगति विजयते रामनामावतारः ॥१॥

अन्तर्विज्ञानवैश्वानरसमुपचये सामिधेनीनिनादः,
स्वर्गङ्गातीर्थयात्रापथिकजनमनस्कारमाङ्गल्यवादः।
स्वच्छन्दानन्दकन्दाङ्कुरणरसमिलत्पूर्वपुण्यप्रसादः,
स्थेयःश्रेयःप्रदाने प्रभवति सुकरो रामनामानुवादः ॥२॥

वाराणस्यां युनद्या उपतटमनिशं मुक्तिसत्रेण यज्वा
विश्वाधीशोऽपि येनाऽनुरणितमनिलं कर्णरन्ध्रे प्रवेश्य।
उन्मेषाज्ज्योतिषोऽन्तः प्रचितमपि तमस्तोममुद्धूय शुद्धा-
ञ्जीवानन्ते पदं स्वं गमयति, तदिदं तारकं रामनाम ॥३॥

जातिर्दूरे प्रयातु, स्थितिरपसरतु, प्रेयसी श्रीरुदास्तां,
बोधो मुष्टिं पिनष्टु, श्रुतमवनमतु, ख्यातिरास्यं पिधत्ताम्।
आचारः श्रान्तिमेतु, व्रतमुपरमतु, प्रश्रयो जोषमास्तां,
सर्वानुद्धर्तुमद्धा विधृतपरिकरं वर्तते रामनाम ॥४॥

सत्यङ्कारे, विषादे, भवशमनजपे, श्रेष्ठिवर्गाभिवादे,
संख्यानारम्भनादे, च्युतिपरिकलने, चैलधावप्रवादे,
गाढं सम्बन्धभङ्गे, करुणविघटने, कीरशिक्षाप्रसङ्गे,
संसाराद्विप्रवासेऽप्यखिलसहृदयैः कीर्त्यते रामनाम ॥५॥

पूर्वैः क्षुण्णे अपीमे स्फुटमतिगहने वर्त्मनी सांख्ययोगौ
निध्यायाऽत्याहितेन प्रतिहतमनसां विश्वयायावराणाम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्वास्योद्भ्रान्तदृष्टिं स्थिरसुखपदवीप्रापकं रामनाम
शब्दब्रह्मप्रतीकं मुखदहरनभोभाव्यमावेदयामि ॥६॥

अश्रान्तश्रौतनृत्यप्रसृमररसना-सृष्टि-चञ्चत्सुवर्ण-
श्रेणीसाहित्यनित्यस्थितिसुख-सुभगम्भावुकैर्मौक्तिकैर्यैः ।
ज्योतिष्मान्हार्ददीप्त्या प्रथमकविवृषा भूषयामास विश्वं,
गुरुयैः पुण्यैरमीभिः सहृदयसुलभैः पूर्यतां सम्पुटोऽन्तः ॥७॥

भूयांसः सन्तु रुच्याश्चपलरसनया भावनीयाः पदार्थाः,
सारं गीर्वाणगव्या मधुरमतितरां रोचते रामनाम ।
अन्ते शैथिल्यलीना मृदुभिरवयवैः साकमेषा रसज्ञा,
यस्याऽवष्टम्भतोऽस्मान्गमयति सहसा स्वर्गसोपानमार्गम् ।

ज्योतिश्चक्रस्य नाभिर्भ्रमति दश दिशो भासयन्यावदुच्चै-
र्यावद्वा कैरविण्या हृदयपिटकमुन्मुद्रयत्योषधीशः ।
तावद्भूभाग्यकल्पद्रुमविकसितमम्लाननामप्रसूनं
सौभाग्यामोदयोगं ज्ञपयति भुवने ज्यायसो भारतस्य ।९।

लोकालोकान्त-लोकान्तर-तिमिरसमुद्धारकं सत्यधाम,
दिव्यैर्भैमैरधःस्थैरपि हृदि विधृतं निर्मलं रत्नदाम ।
उत्तालोलोलवल्गद्भवविपदुदधेस्तारकं रामनाम,
बोधे स्वप्ने सुषुप्तावपि भवतु सदा हार्दसौहार्दसाम ।१०।

——:(:——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(७) तापनीयस्तवकः

रमन्तेऽस्मिन्नित्यं यमिन इति रामाभिधमदः
परं ब्रह्म ज्योतिर्निरुपरमसंवित्सुखमयम् ।
अचिन्त्या यन्माया त्रिगुणकलयाऽकल्पयदिदं
स्वरूपं शक्तयस्त्रावरण-गण-यानादिकमपि ॥१॥

यथा सूक्ष्मे बीजे विततबहुशाखो वटतरु-
स्तथैवाव्यक्तेऽस्मिन्परमपुरुषे विश्वमखिलम् ।
प्रतायन्ते तस्माद्विटप-फलपुष्पच्छदनिभा
विभिन्नैः संस्थानैर्धृतबहुविकल्पाः स्थिरचराः ॥२॥

प्रकाशो रेफात्मा कमलजनुषाऽऽकारवपुषा
मकाराकाराभ्यां शिवमधुरिपुभ्यां शवलितः ।
स्वरूपं रामस्य प्रणव इव देवत्रयमयं
त्रियाज्ञानेच्छाभिर्नियमयति सर्गस्थितिलयान् ॥३॥

समाश्रित्यान्योन्यं प्रकृतिपुरुषौभूय मिलितौ
विधत्तो वागर्थौ भुवनभवनेषु व्यवहृतीः ।
तयोरेकं रूपं निरुपमिति रामात्मकमिदं
परां भुक्तिं मुक्तिं जनयति यथेच्छं प्रणयिषु ॥४॥

य ॐङ्कारारब्धो दिशति जपते मुक्तिपदवीं,
विधत्तो ह्रीमादिर्मधुमधुरवाचां विलसितम् ।
वशीकर्तुं कामानुपसरति मायामनुसरन्,
ददाति श्रीपूर्वः श्रियमपि च रामाक्षरमनुः ॥५॥

दृढान्कर्माकारान्व्यसनतरुकन्दान्पचति य-
द्भवारण्यं घोरं परिदहति तूलोच्चयमिव ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समन्तादालोकं प्रतिहततमिस्रं वितनुते,
तदाग्नेयं बीजं हृदयमिव रामस्य कलये ॥६॥

धरण्यामाग्नेयं, जलधरपथे वैद्युतमथो,
द्युलोके सावित्रं त्रिभिरभिनयैरुन्मिषति यत् ।
तदेवाद्यं ज्योतिर्निगमयदनन्तार्ककलिकाः
परं बीजं रामात्मकमुदयतां गर्भकुहरे ॥७॥

प्रबोधे विश्वात्मा, शयनसमये तैजसवपुः,
सुषुप्तौ यः प्राज्ञस्तदुचितविकल्पैः शबलितः ।
तुरीयावस्थायामनुभवपथे संयमवतां
स एवायं रामः स्फुरति परसंवित्सुखमयः ॥८॥

बलात्कारं कारं भवजलधिपारं वरयितुं,
प्रभुं स्मारं स्मारं प्रणतजनतातारकममुम् ।
सुधासारं सारं निगमवचसां, तारसहितं
मनुं वारं वारं कुरुत हृदये हारममलम् ॥९॥

त्रयो लोका वेदा दिविषदवतंसा हुतभुजः
समन्वीयन्तेऽस्मिन्परमचितितत्त्वे स्वरसतः ।
तदेवैदम्पर्यं चिरनिगमनीनां स्थिरगिरां
स्फुटीकुर्वन्त्येताः प्रयतहृदि रामोपनिषदः ॥१०॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(८) निध्यानस्तवकः

श्रोतव्यं मन्तव्यं
ध्यातव्यं यत्परं तत्त्वम् ।
निर्धार्य रामनाम्ना
चिन्तय चेतश्चिरं तत्त्वम् ॥१॥

षट्चक्रभेदकलया
विहितारोहः सहस्रारे ।
संवित्तन्त्रीकेन्द्रं
समुपेहि पुनः पुनर्जीव ! ॥२॥

एकान्तशान्तभवने
निभृतं वातायनानि संवृत्य ।
उद्घाट्याऽन्तःकोशं
गृहाण चिन्तामणिं भूत्यै ॥३॥

अन्तः प्रवर्त्य नयने,
निरुध्य पारिप्लवं पवनम् ।
दीपय दहरगुहायां
प्रणिधाय तमोपहं ज्योतिः ॥४॥

गीतं शतशः श्रुतिभि-
र्विवृतं च सहस्रशः स्मृतिभिः ।
शोधितमखिलैः शिष्टैः,
सेवस्व महौषधं शान्तेः ॥५॥

अमरगवीनिष्यन्द-
स्तापत्रयसूदनाय पर्याप्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेयः सुधातिशायी
चेतश्चषकेण रामरसः ॥६॥

ॐकारेणाऽङ्कुरितं
रमवर्णाभ्यामथ द्विदलम् ।
पल्लवितं च श्रुतिभि-
र्भज नादब्रह्मणः कन्दम् ॥७॥

दहराकाशे दृश्यं
छायापुरुषं श्रियो धाम ।
युक्त्या विभाव्य सततं
मृत्योर्भीतिं मनो मुञ्च ॥८॥

संख्यातनामरूपं
विख्यातमनामरूपमपि ।
गुणसागरमगुणमपि
प्रतिपद्यस्वापूर्वपुरुषं तम् ॥९॥

सामान्यं लोकानां
तथाप्यसामान्यमीशानम् ।
रामं विभाव्य चेतो
जगद्विरामं प्रपद्यस्व ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) हृदयस्तवकः

भूभागेपचिते शरीरनगरे साकेतसङ्केतिते
चित्तामात्ययुतो दशेन्द्रियरथो जीवो जगन्नायकः ।
कान्ताभिः सह शान्तघोरगुरुभिस्त्रेधाभवद्वृत्तिभि-
र्भुञ्जानो विषयांस्तदुद्भवरसैरापूर्यजीवनम् ॥१॥

रामो बोधमयो बभूव मधुरः शान्तासुतः सत्त्वभू-
स्तीव्रा तर्कमसूत, यो हि भरतो नाम्नाऽनुकूलोऽनुजः ।
निर्वेदोपरमौ परा त्वजनयद्यौ लक्ष्मणः शत्रुहा,
ज्येष्ठं वत्सलमन्वयुः प्रियहिताः सर्वेप्यमी भ्रातरः ॥२॥

दुर्भावान्द्विषतोऽध्वरेषु दलयन्सद्देशिकं कौशिकं
प्रीणातिस्म, समुज्ज्वलोऽस्य कृपया बालोऽपि शान्तासुतः ।
नीतोऽसौ गुरुणा विदेहविषये, सन्दर्श्य शक्तिं परां
सीतां शान्तिमयीमवाप्य मुमुदे बन्धून्निजान्प्रीणयन् ॥३॥

घोरा स्वात्मजवृद्धये तरलिता कामोदितात्कैतवा-
द्रामं सद्विषयादपूर्णवयसं प्रावासयद् द्वेषतः ।
निर्वेदेन निजानुजेन सहितः शान्त्याऽप्यसौ कान्तया,
चिन्तारण्यमुपेत्य लुप्तविभवो बभ्राम नैका दिशः ॥४॥

कैशोरेऽप्य घने वने निवसतः प्रत्यर्थिनो निघ्नतः
शान्तिं प्राणसमां जहार कितवो मोहो महान्रावणः ।
सोऽयं व्याकुलितः प्रियाविरहतो, भ्रात्रा समुद्बोधितः
शोकेनोत्तरलो वनाद्वनमगादन्वेषयन्प्रेयसीम् ॥५॥

योगाद्वायुभुवो विवेकवपुषं सुग्रीवमेत्याऽऽदरा-
त्कृत्वा मित्रममुं प्रतोष्य हननाद्वद्धेषात्मनो बालिनः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्वेष्टुं दयितां युयोज सबलं योगं मरुत्सम्भवं,
सोऽप्युत्प्लुत्य विवेद तां विरहिणीं कामोदधेः पारगाम् ॥६॥

सार्द्धं मित्रबलेन वैरिणमभिप्रस्थाय रामोऽध्वनि
सँश्रक्रे प्रशमं जटायुवपुषं दुष्टेन निष्पीडितम् ।
बद्ध्वा सेतुमलं दृढां धृतिमयीमुत्तीर्य कामार्णवं,
लङ्कां भीतिमयीमवाप सहसा मोहेन दुःशासिताम् ॥७॥

सञ्जाते तुमुले मिथः प्रहरणे बोधस्य मोहस्य च,
चक्रे वीर्यबलेन रावणवधं रामः प्रकामं दृढः ।
शान्तिं प्राप्य रिपोर्जयेन मुदितः, प्रत्येत्य देशं निजं,
स्वान्बन्धून्प्रकृतीरमोदयदयं बोधः प्रभावोज्ज्वलः ॥८॥

बोधः शान्तिमयश्रिया सह चिरं सिंहासनं भूषय-
न्न्यातेने चरितैः शुभैरधिभुवि स्वाराज्यहर्षोत्सवम् ।
अन्ते शान्तिमिमां विकल्पकलितामालोच्य हित्वा बहिः
कैवल्यं कलयन्विहाय विषयं प्रापाऽपवर्गास्पदम् ॥९॥

नानावृत्तिमनःसखाहशरथाज्जीवाज्जनिं बिभ्रतो,
मोहं रावणमुत्प्रमथ्य जयतो रामस्य बोधात्मनः ।
शान्त्या सार्द्धमुदेत्य, तामपि निराकृत्याऽऽत्मनः केवली-
भावं भावयतः स्फुटन्ति सुतरामाध्यात्मिकग्रन्थयः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१०) सपर्यास्तवकः

आध्यात्मिक्यां कलायां यमनियमवतां भासतेयोऽन्तरात्मा,
पौराणीमाधिदैवीं सरणिमनुगतैर्गीयते माधवात्मा ।
भौतिक्यां प्रक्रियायां स्फुटघटितदृशो राघवं यं वदन्ति,
देवोऽसौ विश्वरूपः सुकृतिभिरभितः पूज्यतेचाऽधियज्ञम् ॥१॥

जीवं सम्बोध्य युक्त्या, पवनरथमथारोप्य, नीत्वेापरिष्टा-
द्रामस्योत्फुल्लपद्मासनमधिवसतः सक्रियायां नियुज्य ।
तत्पादोद्यन्नवेन्दुस्रवदमृतरसैरामृता आत्मवन्त-
स्तापान्निर्वाप्य सर्वान्प्रियमभयपदं भावयन्तो जयन्ति ॥२॥

आवाह्यान्तः प्रफुल्ले दशदलकमलेऽनाहतैर्मन्द्रनादैः,
श्वासैः संवीज्य भूयश्चरणसरसिजे, प्रेमबाष्पैर्विमृज्य ।
सङ्कल्पेनोपहृत्य प्रकृतिविरचितान्राजराजोपचारान्
रामस्येमां नमस्यां हृदि परिकलये पूर्णचर्यां सपर्याम् ॥३॥

अन्तर्नादे विबुद्धे, तिमिरजवनिकागाढबन्धे विमुक्ते,
श्वासेोन्मेषेण सार्द्धं प्रसरति मधुरे धैवते नामगीतेः ।
अन्तर्दीप्तैस्तरङ्गैरविरलमिलितैरुज्ज्वले चित्तरङ्गे,
नृत्यन्तीं चित्कलां तां महयितुमुचितैर्भावपुष्पैः समीहे ॥४॥

विश्वं दूरादुद्युलोकादुद्युतिभिरकृतिभिर्भासयत्यर्कवद्यो,
विश्वद्रीचः प्रसादान्दधदपि सहसा दुर्ग्रहो व्योमवद्यः ।
आदर्शे रामनाम्नि प्रतिफलितमदो बिम्बरूपं विभाव्य,
श्रद्धासिद्धोपचारैः करपुटघटितैर्भूयशः पूजयामि ॥५॥

ज्ञाते यस्मिन्यथावत्स्थिरचरमखिलं ज्ञायते ज्ञेयजातं,
लब्धे यस्मिन्नलभ्यं किमपि परतरं शिष्यते नैव तत्त्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्यार्चायां कृतायां सुकृतिभिरचिरादर्च्यते चार्चनीयं,
सर्वान्तर्यामिणोऽस्य स्फुरतु समुदयत्सामरस्या नमस्या ॥६॥

यस्मिन्भित्ताविवैतत्त्रिगुणशवलितं भासते विश्वचित्रं,
प्रोता ओताश्च सूत्रे मणय इव समन्वीय निःशेषभावाः ।
तस्यैव स्वच्छसत्त्वप्रतिफलितशुभाभोगबिम्बाभिरामं
रामं सद्भावपुष्पैः स्वरससुरभिभिर्भूयशश्चार्चयामि ॥७॥

वृत्तिर्यत्रेन्द्रियाणां न भवति, मनसश्चापि नैव प्रवृत्तिः,
शक्तिर्वाचां न साक्षान्नच चिरमुचिता कल्पनायाः प्रसक्तिः
प्रत्यक्तत्वस्य तस्यावगतिविरहिता कीदृशी स्यात्सपर्या,
जन्मान्धस्येव मे स्यादभिनयसदृशी लक्ष्यशून्या नमस्या ॥८॥

विश्वाधीशस्य सर्वस्त्रिभुवनविभवः सत्यसङ्कल्पसिद्धः,
कार्या केनार्हणाऽर्हा जगति भगवतः प्रीतिकामेन हन्त ।
हंहो प्रीत्यै प्रशस्ता, प्रभवति रुचिता स्वात्मसम्पच्च भक्तिः
सम्पूर्यैतानयैव स्वयमुपहृतया शुद्धचर्या सपर्या ॥९॥

आदित्यब्रह्मचारी पवनतनुजनुर्यस्य भक्तिप्रदीपः,
क्षाराब्धिर्यत्र पोतः स च यमनुगतश्चित्सुधाब्धौ निमग्नः ।
त्रैलोक्योद्यानशोभासुरभितयशसस्तस्य विश्वेश्वरस्य
शुष्कः पुष्पाञ्जलिः स्यात्क्षणपरिचितये धृष्टभावोपहारः ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधिदैविककाण्डे

(१) प्रगीतिस्तवकः

जयति संस्तुतेः सत्यपूरुषः
श्रुतिषु विश्रुतो विश्वपूरुषः ।
क्रतुषु संस्तुतो यज्ञपूरुषः,
सुकृतिभिः स्तुतः पुण्यपूरुषः ॥१॥

जयति निर्गुणः पूर्णचिन्मयः,
शवलतामिवोपेत्य मायया ।
सगुणसंविदो गोचरोभवन्,
परमपूरुषो रामनामकः ॥२॥

जयति यौगिकध्यानवैभवा-
द्बहिरुदेत्य नः प्रीणयन्दृशः ।
सफलयन्बलं भावनाबलं,
पुरुषसत्तमो राघवात्मकः ॥३॥

जयति वैदिकं वर्त्म दर्शयन्,
परमपूरुषः संश्रितः श्रिया ।
हृदयविस्फुरत्सर्वमङ्गल-
स्त्रिगुणदेवतायोगभूः प्रभुः ॥४॥

जयति दैवतं वर्गमूर्जयन्,
मनुजमण्डलं भूरि भूषयन् ।
अपि रसातलं बाहुमुन्नयन्
परम ईश्वरोऽनश्वरोदयः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयति गौरवोद्दामनामकं,
क्षपितदुश्चरत्तामसामयम् ।
सकलसम्पदां धाम कामदं,
परमदैवतं रामनामकम् ॥६॥

जयति निश्चलद्भावपावकः,
स्फुटभवाटवीदावपावकः ।
कलिमलप्रतीकारकारकः,
प्रभुरुपाश्रितोद्धारधारकः ॥७॥

जयति विस्फुरद्दीप्तिशक्तिभि-
स्तिमिरमान्तरं चापि संहरन् ।
त्रिभुवनोदितस्नेह वर्द्धितो
मनुजमण्डितद्वीपदीपकः ॥८॥

जयति पावकः, श्रीधरो, बुधः
प्रतिकृतिर्विधेर्लोकबान्धवः ।
अमृतदीधितिर्जिष्णुरीश्वरः,
सकलदेवताभावभूः प्रभुः ॥९॥

जयति निग्रहानुग्रहप्रभू
रघुकुलोदितो दिव्यवैभवः ।
अनुगतार्थया रामसंज्ञया,
नरशरीरभृद्देवपुङ्गवः ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२) अवतारस्तवकः

कामं सन्तु विभूतयः शबलिता उच्चावचाः सर्वतः,
किन्त्वार्यैरवधार्यते रघुपतिः पूर्णावतारः प्रभोः ।
दैवीसम्पदिहोदिता समुदिता लोकम्पृणैः सद्गुणै-
र्भैमं मण्डलमुन्नमय्य सहसा कल्पान्तमुज्जृम्भते ॥१॥

मत्स्योऽग्रे सलिलेशयस्तदनुजः कच्छे वसन्कच्छपः,
क्रोडोऽरण्यचरः, परो नरहरिर्ग्राम्यो वनस्थो द्वयम् ।
खर्वः पूर्वनरोऽपरः परशुभृद्रौद्रस्ततः सत्तमो
रामः प्रादुरभूदनेन शुशुभे सृष्टेर्विकासक्रमः ॥२॥

ख्याता विश्वपतेर्गुणैर्बहुगुणै रामावतारास्त्रय-
स्तेष्वेको जमदग्निजोऽतिशयितक्रोधोद्धतस्तामसः ।
अन्यो वीर्यविलासमिश्रचरितो नन्दात्मजो राजसः,
श्रीरामो रघुवंशमौक्तिकमणिः शान्त्युज्ज्वलः सात्विकः ॥३॥

लक्ष्म्याऽऽलिङ्गितमङ्कपीठगतयाऽ शेषोत्तमाङ्गानतं
श्यामं शङ्खगदारविन्दकुलिशैश्चिन्हैर्विराजत्करम् ।
तन्वन्तं विनतात्मजन्मनि मुदं पद्मोल्लसल्लोचनं
श्रीरामं भुजयोर्युगेन सुभगं जानामि नारायणम् ॥४॥

सम्भूत्या जनकाङ्गणैरवकृता संसेव्यमानः श्रिया,
प्रेमार्द्रैरनुवर्तिभिः परिवृतोऽनन्तादिभिः सद्गुणैः ।
संसारोदधिमध्यगाहिशयनं सम्भूय लोकस्थितिं
कुर्वन्सात्विकवैभवो विजयते श्रीरामनारायणः ॥५॥

भास्वाननमण्डले, भुजयुगे शक्त्या महत्या श्रितो,
द्रष्ट्या विघ्नहरः,सदाशिवमयः, स्थित्याऽच्युतश्चाऽऽत्मना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चानामतितेजसां सुमनसामेकावतारात्मकः
श्रीरामः सकलैर्मतो वसुमतीसन्तानकल्पद्रुमः ॥६॥

वृक्षाणां जलचारिणां वनसदां वैहायसानां नृणां
वर्गाः स्थावरजङ्गमाः प्रगुणिता नानावतारैर्विभोः ।
अंशास्तेषु भवन्तु विष्टपपतेरल्पाधिका मौलिकाः,
सर्वाङ्गैः परिपूर्णतामुपगतो रामावतारः परः ॥७॥

शान्तिश्चेतसि, कान्तिरास्यशशिनि, क्षान्तिः प्रपन्नागसि,
श्रान्तिः श्रेयसि, दान्तिरिन्द्रियगणे, क्रान्तिर्द्विषां मन्थने ।
मर्यादापुरुषोत्तमे रघुपतौ निःसीममुन्मीलिता
दिव्यं वैभवमङ्कयन्ति सुतरां पूर्णावतारोचितम् ॥८॥

उद्वृत्ताः खरदूषणप्रभृतयस्त्रैलोक्यनाडिन्धमा-
स्तेषां शासनकार्मणेन जगतां विद्रावणो रावणः ।
तस्याप्युत्कटगर्वपर्वभिदुरो वाली महानुद्भट-
स्तानेतान्युधि मज्जतो विजयते दिव्यावतारप्रभा ॥९॥

यः सत्यव्रतरक्षको, गुरुभरं पृष्ठे दधानो भुवः,
प्रोद्धर्ता जगतो विपज्जलनिधेः, प्रह्लादपक्षोद्यतः ।
नम्रो, रामपदोदितो, नरकजिद्बुद्धः, स्थितिस्थापकः
सोयं भाति दशावतारविभवादर्शः समष्ट्यात्मकः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(३) प्रेमस्तवकः

ध्यायं ध्यायं त्रिभुवनपते रामरूपं स्वरूपं
नामं नामं चरणकमलोदीर्णरागं परागम् ।
गायं गायं बहुलविलसद्दिव्यभावं प्रभावं,
कामं कामं चिरमुपचितं पूरयेयं, जयेयम् ॥१॥

ख्यातां शान्तिं प्रगुणकरुणापूरपुण्यस्रवन्तीं,
स्फीतां शक्तिं सुरपथरजोमार्जनावैजयन्तीम् ।
स्निग्धां दृष्टिं प्रणतजनताप्यायनां कामधेनुं,
शुद्धां वृत्तिं कुशलजननीं भावये राघवस्य ॥२॥

चित्रैर्नेत्रैस्त्रिभिरथ भुजैरानवैर्वा चतुर्भि-
र्लोकातीतान्हरहरिविधीन्स्तब्धशक्तिर्ग्रहीतुम् ।
मुग्धा बुद्धिः प्रकृतिविलसद्देहलक्ष्म्याऽभिरामं
रामं प्रेम्णा सपदि वृणुते लौकिकं देवदेवम् ॥३॥

स्थेयः शिक्षारसरसनया माधुरीं साधुरीतिं
धृत्वा पुण्याक्षरगुणनिकोपक्रमं लब्धवर्णाः ।
नामग्राहं रघुकुलविभोर्वन्दिकल्पाः शुकाद्या-
स्तिर्यञ्चोऽपि प्रणयिहृदयं प्रीणयन्तो जयन्ति ॥४॥

सूक्ष्मो भेदः स्फुरतु वदने दन्ततालूपयोगे,
किं वैशेष्यं समरसवतो रामवर्णामृतेन ।
गुम्फन्कीर्तिं सुकविरथवा नामशब्दानुकारी
यन्त्राकारः शुकविरभितः प्रेमभूमिर्भवेयम् ॥५॥

संश्लिष्यन्ते प्रभुचरणयोः सूक्ष्मभावेन बिद्धा
मुक्ताकाराः सुकृतमणयः प्रेमसूत्रावनद्धाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां सूतिर्भवजलनिधेर्गर्भभागात्प्रशस्ता
युक्ता शुद्धिर्विरतिरहितैः शुद्धसंवित्तरङ्गैः ॥६॥

आत्मारामा मुकुलितमनोवृत्तयो निर्विरामं
यस्योल्लासे सकलजगदामोदितं भावयन्ति ।
प्रेमापूरप्रसरललितोद्भासि तद्दिव्यपुष्पं
श्रद्धापूर्वं हृदयविधृतं नित्यमुत्तंसयामि ॥७॥

सान्द्रस्नेहस्वरससरसप्रेमसूत्रानुबन्धी
पूर्णालोकः स्फुरतु सततं भावनादीपिकायाम् ।
येनोन्मीलद्धृदयकुहरान्तर्गतं रामबिम्बं
बद्धश्रद्धः प्रणिहितदृशा साधु नीराजयेयम् ॥८॥

भावावेशस्तिमितनयनामोदबाष्पोदवर्षै-
र्भूयः क्लिन्ने हृदि पुलकिते पाणिबन्धं विधाय ।
अन्तस्तन्त्रीमधुररणितेष्वेकतानावधान-
स्तेजोबिम्बं मुदितमुदितं भावयन्स्यां कृतार्थः ॥९॥

यं ध्यायन्तः परमपुरुषं निर्मलं सत्यनित्यं
प्रज्ञोन्मेषप्रसृमरदृशा विश्वदीपं विदन्ति ।
भास्वत्तेजोङ्कुरकृतजनेरिष्टदेवस्य तस्य
दिव्यं बिम्बं प्रतिफलतु नः प्रेमपीयूषपात्रे ॥१०॥

—:o:—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(४) भावस्तवकः

कश्चन दिव्यः पुरुषः
सरयूतीरे समवतीर्णः ।
परिचेयः सविमर्शं
लक्ष्म्या सर्वातिशायिन्या ॥१॥

सरयूतरङ्गमरुता
निष्पूतं स्निग्धनीलमणिम् ।
उप्त्वा सुवर्णसूत्रे
हृदये दधतः सदा धन्याः ॥२॥

आदिकवेः सर्वस्वं
चिरस्थिरं भारतस्य स्वम् ।
दिविषद्वरीरहस्यं
रत्नं सर्वात्मनाऽवश्यम् ॥३॥

सुरभीकुर्वन्भुवनं
भक्तानाप्याययन्मधुपान् ।
सरसे प्रेमोपवने
रामयशःस्तवक उल्लसति ॥४॥

दिव्यावदानपीठे
प्रतिष्ठिता भावसम्पन्ना ।
नमयति शिरांसि जगतां,
नीलमणेः कामदा प्रतिमा ॥५॥

धन्यानि तानि मन्ये
साकेते यानि भूतानि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्सङ्गतविशेषे
दैवी सम्पत्समुद्भूता ॥६॥

श्रीरामपादनीलो-
त्पलमकरन्देन संभिन्नः ।
साकेतोपवनमरुत्
सत्यं सत्यं जगत्प्राणः ॥७॥

मधुमधुरः श्रुतिसुखद-
श्चक्षुष्यः शीतलः सुरभिः ।
सर्वेन्द्रियपरितृप्त्यै
पर्याप्तो रामनामरसः ॥८॥

तीर्थं तत्पुरुषतमं
यस्मिन्पीठे सितासितयोः ।
सीतारामप्रभयोः
सम्भेदो भुक्तिमुक्तिकरः ॥९॥

अङ्कुशसहस्रपत्र-
च्छत्रध्वजवज्ररेखाङ्कम् ।
त्रिभुवनशरणं चरणं
सरयूपुलिनाङ्कितं वन्दे ॥१०॥

—०:—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(५) प्रभावस्तवकः

यैः स्नातं विमलोदकेषु सरितां, पुण्याश्रमाः सेविताः,
शास्त्राण्यन्तरुपाहितानि, तपसां पन्थान उन्मीलिताः ।
सारोद्धारविचारचारुचरितैस्तैरप्यगस्त्यादिभिः
पीतं रामरसौषधं भवविषज्वालावलीशान्तये ॥१॥

बाल्यं मोहमयं, विषाक्तविषयैरालोडितं यौवनं,
वार्धक्यं विवशं, वृथैव दिवसा, निद्रावृता रात्रयः ।
संयम्य क्षणमप्युपायनिचयैः कल्लोलितं मानसं,
ध्येयं राघवपादपङ्कजरजः संमाजितुं जीवनम् ॥२॥

निद्राणेषु मखेषु, जाग्रति क्रतौ, योगे प्रमीलालसे,
विद्राणेषु तपःसु, माद्यति मदे, तीर्थेषु झाङ्कारिषु ।
अस्तव्यस्तदशावशासु सुधियामाचारनिष्ठास्वपि,
का चिन्ता, सकलात्मशोधनविधौ जागर्ति रामः प्रभुः ॥३॥

कामं माद्यतु सर्वथा प्रमथनः कालः करालः कलि-
स्त्रैगुण्योद्बलिता असह्यविषयाः पाशा विकर्षन्तु वा ।
नामोच्चारणमात्रसंहृतजगज्जन्मत्रयीकल्मषं
पुण्यश्लोकशिखामणिं स्मृतवतां शान्तिर्नरीनृत्यति ॥४॥

स्त्यायन्तां गगने घना घनघटाः, पङ्कैर्मही लिप्यता-
मात्रामन्तु तमांसि वा दश दिशो, द्यौः कज्जलं वर्षतु ।
आवृण्वन्तु समन्ततो जवनिका नीला, न कापि क्षतिः,
स्वान्ते प्रोज्ज्वलरामचन्द्रवदनज्योतिः समुज्जृम्भताम् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आयुर्योऽनृतसम्पदो घनघटासौदामिनीशोभनाः,
कर्षन्तु क्षणमञ्जसा विषयिणां धूम्रावधाना धियः ।
अन्तस्तात्त्विकशान्तिशोधितदृशामुन्मीलनायोद्धुराः
कल्पान्तं ज्वपयन्ति भूमिसुषमां रामस्य देव्यः श्रियः ॥६॥

ज्ञानं तात्त्विकमञ्जसाऽवगणितं विज्ञानकोलाहलै-
रध्यात्मं प्रगतिर्बलात्प्रतिहता वादैर्नवैर्भौतिकैः ।
निष्पिष्टा भृशमार्यसंस्कृतिरपि स्वच्छन्दविद्राविणी,
रामस्यैव पदप्रपत्तिरुचिता निःश्रेयसावाप्तये ॥७॥

निःसङ्कोचमुदीर्यतां चिरचितं सङ्गीतमात्रं श्रुतिः,
कन्थाकर्पटवत्स्मृतिः प्रतिपदं रथ्यासु विक्षिप्यताम् ।
आचारोऽस्थिररूढिवादविवरे व्याकीर्यतां भौतिकै-
र्निद्रालोर्जगतः प्रजागरकृते जागर्ति रामध्वनिः ॥८॥

कालव्यालकरालफूत्कृतिनिभैर्दुर्भाग्यनैर्लौकिकै-
राक्रम्य ग्रसितां प्रसह्य गमितामव्याप्यवृत्तिस्थितिम् ।
प्राच्यां संस्कृतिमञ्जसा ज्वपयितुं सर्वार्थसिद्धौषधं
दिव्यादर्शनरेन्द्रचित्रचरितं जागर्ति सङ्गीतये ॥९॥

निध्याताः शतशः श्रुतिस्मृतिगिरो व्याख्यानवादैः समं,
प्रस्थानानि विलोडितानि बहुशस्तीर्थङ्कराणां चिरम् ।
आचान्तानि सतां वचांसि निचितान्युद्बुद्धया श्रद्धया,
सारस्तारकरामनामभजनं निर्धार्यते केवलम् ॥१०॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) सौभाग्यस्तवकः

त्रेताग्निशोधित-सुवर्णमयावदानैः
सौभाग्ययोगमभिदर्शयतः पृथिव्याः ।
रामस्य पुण्यपुरुषस्य चरित्रचित्रा-
ण्युद्भासयन्त्यखिलभावुकचित्तभित्तीः ॥१॥

प्रोत्सार्य तामसतिरस्करिणीं समन्ता-
द्विष्णोः पदे स्फुरितुमर्हति रामचन्द्रः ।
यत्पादनिश्च्युतनवामृतबिन्दुधारा
वाञ्छन्ति पातुमचिरं तृषिताश्चकोराः ॥२॥

सद्भावभावन-विवेधितधर्मधैर्या-
स्ते पूर्वपुण्यपुरुषाः कति भाग्यवन्तः ।
आप्याययन्नवयवान्भवतापतप्ता-
न्साक्षात्कृतोऽमृतरसः खलु यैर्निपीतः ॥३॥

उद्भूसदर्पदलनैः सदनुग्रहैश्च
द्वैराश्यमुद्रमयतो महसः प्रशान्तेः ।
लीलागृहीतवपुषो रघुवंशविष्णोः
शेषोऽपि शेषयति कीर्तयितुं विशेषान् ॥४॥

उत्तालतालतरुवत्कुलमुन्नमय्य
भूमावुदञ्चितवतो जयवैजयन्तीम् ।
पुंसः परस्य शतशः प्रतिमाप्रतीका
उत्तम्भयन्ति चिरकालमनन्तकीर्तिम् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धात्रा दृशौ प्रणयिनां, श्रवणे च साम्ना
देवेन येन गमिते कृतकृत्यभावम् ।
लोकोत्तरेण महनीयमहामहिम्ना
ख्यातस्य तस्य मननं त्रिजगत्पुनाति ॥६॥

भूमौ निपत्य रजसा सह संलुठन्तो
लोका जडप्रकृतयः क्षणमुत्प्लवन्तु ।
संहृत्य पङ्कमपहृत्य कलङ्कशैलीं
सोऽयं प्रभुः कतकवद्धिमलीकरोति ॥७॥

अश्रान्तविभ्रमविषादतमोवसन्ना
नैव प्रभां मलिनयन्ति विभोः प्रपन्नाः ।
पूर्णोदरस्फटिककुम्भनिभोऽभिशुभ्रो
देवः पिपर्ति करुणासुधया समस्तान् ॥८॥

साक्षात्कृतं प्रचितयत्नबलैश्चिरत्नै-
र्भूभाग्यदेवमवतीर्णममुं विहाय ।
देवान्युलोकवसतीननुमेयकल्पा-
न्केनाऽध्वना समुपयातु नरो वराकः ॥९॥

भूभाग्यशैलशिखरोदित ! देवदेव !
भावत्कीर्तिकिरणाः प्रगुणाः सहस्रम् ।
उन्मोच्य पङ्कजनुषामपि कोशमुद्रा-
मुन्मीलयन्ति सरसां श्रियमन्तरङ्गे ॥१०॥

——*——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(७) भावनास्तवकः

केचिद्वदन्तु भगवन्तमपि स्वमेव,
केऽप्यंशिनं, कति सखायमधीशमन्ये ।
आत्मानमस्य जगतां स्थपतेर्दविष्ठं
दासानुदासपदरेणुकमेव मन्ये ॥१॥

लोके तृतीय उत सप्तमभूमिकायां
सङ्कल्पयन्त्यखिलकल्पकमल्पवाचः ।
स्रष्टा चतुर्दशजगन्मयमालिकायाः
प्रत्यग्धियोऽप्यविषयः कथमूहनीयः ॥२॥

पश्यामि विश्वमभितश्चिरमन्दिराणि,
भद्रासनान्यपि धृतानि शतेषु तेषु ।
अन्तर्बहिश्च भवतः पदमप्यविन्द-
न्पर्याकुलोऽस्मि भगवन् क्व भवान्निलीनः॥३॥

विश्राव्य विश्वमभि विश्वजनीनदृष्टिं
विश्वेशितुर्निलयने रुचिरैचिती किम् ।
किं वा सहस्रकरमप्यभिभासमानं
नालोकते निजदृशो विकृतेरुलूकः ॥४॥

घण्टाध्वनीननुसरन्प्रतिहारभूमिं
प्राप्तोऽपि संवृतकपाटपुटावरुद्धः ।
क्रन्दाम्यनन्यशरणः करुणस्वरेण
हे नाथ ! दर्शनपथं न कथं प्रयासि ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वारान्तिकं भगवतः कथमप्युपेत्य
शब्दायते प्रतिहतः प्रविविक्षुरन्तः ।
द्वास्थैः कपाटपुटके पिहितेऽपि दूरा-
दाक्रन्दनं पततु कारुणिकस्य कर्णे ॥६॥

आकर्ण्य कर्मवणिजामुपजीव्यमिभ्यं
मुक्तावदातहृदयं सदयं भवन्तम् ।
द्वारान्तमेत्य जयनादमुदीरयन्तं
दीनं प्रसादमधु पायय, वासयाऽन्तः ॥७॥

तृप्ते श्रुती भवनकिङ्किणिकानिनादैः,
पर्युत्सुकेऽथ नयने सफले विधित्सोः ।
सङ्कल्पकल्पवपुषो हृदयस्य तन्त्री-
मन्द्रं निनादयति निश्वसितप्रसारः ॥८॥

मोहाद्विहाय भवदङ्घ्रिमधोऽवतीर्णः
पर्याकुलः प्रतिपदं विपथे स्खलामि ।
मार्गं प्रदाय दयया बहुदीनमेन-
माहूय वासय, पृथग्भविता न भूयः ॥९॥

कर्माणि सन्ति बहुधैव मयार्जितानि,
नैतान्यलं प्रभवते भवते स्वदन्ते ।
रिक्ताञ्जलिः कथमुपैमि परं शरण्यं,
तुच्छोपहार इव मस्तकमेतदस्तु ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(८) निर्वेदस्तवकः

अहह ! भवनवज्वरत्रिदोषै-
विषमदशां गमितः प्रदीप्ततापः ।
अमृतमपि वमन्नरोचकेन
स्खलितधृतिर्विलपामि शान्तिकामः ॥१॥

भवसलिलनिधेस्तलाच्चिरत्नै-
र्दुरधिगतं सकलार्थदायि रत्नम् ।
तृणवदवगणय्य काचभूषां
हृदि निदधत्परिहासभूमिरस्ति ॥२॥

दिवमुपगमितः क्षणं तरङ्गैः,
सपदि रसातलमापितो भ्रमीभिः ।
सलवणसलिलं पिबन्निमज्ज-
न्भवजलधौ विलयोन्मुखो विपद्ये ॥४॥

विरसमशनमातपः प्रदीप्तः,
प्रहृतिरनागसि, सैकतश्च पन्थाः ।
भृतिकर इवातिभारभुग्नः
कथमविरामगतागते करोमि ॥५॥

अविनयविवशं मनो नियन्ता,
स्खलितगतानि हयाः कदिन्द्रियाणि ।
प्रतिपदशिथिलं रथः शरीरं,
भवविषयं कथमुत्तरेन्ममात्मा ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुपदगमकोऽर्चिरादिमार्गः
स्खलितदृशः पथिकस्य मे दवीयान् ।
कथमभिमतधाम भावयेत
तिमिरतिरोहित एष धूममार्गः ॥६॥

भगवदुपवनान्मयाऽपहृत्य
पणपणितं सुमनःशतं महान्तः ।
समुदमुपहरन्ति मन्दिरान्त-
श्चिरविकृतं त्वहमुत्करे क्षिपामि ॥७॥

रुजमुपचरितुं भवाग्निदग्धो
भवदहनं चरणं चिरं प्रपन्नः ।
समुचितमनुमन्यतेऽनुतप्तं,
शिरसि सुधाशिशिरः करो निधेयः ॥८॥

शिरसि शिथिलितः शिलाविभङ्गो
भृगुरवलम्बलवेऽपि दुर्विधेऽधः ।
तिमिरमतनु, पिच्छिला च पद्या,
दहरगुहाशरणं समुज्ज्वलाऽन्तः ॥९॥

श्रुतिरतिजरती, स्मृतिर्विशीर्णा,
व्यवहृतिरस्तमिता मतिः प्रयाता ।
धृतिरपि विहता, स्थितिर्विलीना,
रघुकुलदैवतमेव मे प्रपत्तिः ॥१०॥

—o—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) प्रपत्तिस्तवकः

भगवन्करुण एष पर्वता-
त्पतितोऽब्धौ शरणं प्रपद्यते ।
भवता क्षणमप्युपेक्षितः
सहसा बुद्बुदवद्विपद्यते ॥१॥

विषयान्विषदूषितांल्लिह-
न्परितप्तो जडतामुपागतः ।
शिशिरं करुणामृतं करैः
परिलिप्याऽऽशु नरेन्द्र ! जीव्यताम् ॥२॥

जनकेा, जननी प्रियः सुहृ-
त्प्रभुरात्मा, विभवोऽपि मे भवान् ।
यदि वा भवताऽप्युपेक्ष्यते
कतरोऽन्यः करुणां करिष्यति ॥३॥

भवता भवतापहारिणा
नयनान्तेन निरीक्षितः सकृत् ।
मुदितामुदितां विभावय-
न्नधिरोहाम्यभयं परं पदम् ॥४॥

विपदन्तकरं निरन्तरं
प्रभवन्तं भगवन्तमन्तरा ।
जनयन्ति न केचि शान्तिदं
सुखसन्तानमनन्तमान्तरम् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिनिर्मलवैभवो भवा-
न्मलिनं मां यदि नानुकम्पते ।
भसितैर्विरहाग्निभासितैः
सकलाङ्गानि विधूलयाम्यहम् ॥६॥

मलिनोऽपि दयार्द्रया दृशा
प्रभुणा दूरत एव शोध्यताम् ।
पदमुज्ज्वलमश्रुधारया
मलिनीकर्तुमसौ न निर्लुठेत् ॥७॥

तरुणां करुणातरङ्गिणीं
सततं वाहयतो महीभृतः ।
चरणं शरणं समाश्रये,
द्रुतमीहे भवतापनिर्वृतिम् ॥८॥

श्रुतिरस्तु परा जरातुरा
स्मृतिरप्यस्तु विमर्ददुर्बला ।
श्रुतिरस्त्यनपायिनी प्रभोः,
स्मृतिरेषा समुदेतु सन्ततम् ॥९॥

अधिगन्तुमनाः परं पदं
शरणं यामि विभोः परं पदम् ।
अवतीर्णमतीव कीर्तये,
नरदेवं प्रभुमेव कीर्तये ॥१०॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१०) आराधनास्तवकः ।

श्रीमन् ! भवन्तमवकीय रसप्लुताभि-
दूरोन्मिषन्नयन-वन्दनमालिकाभिः ।
त्रैधातुके लघुतरे नवमन्दिरेऽस्मि-
न्नावाहयाम्यनुगृहाण गृहाण भावम् ॥१॥

शैलोन्नतान्यधिकसुन्दरमन्दिराणि,
वाह्यानि सन्ति शतशः प्रतिमास्पदानि ।
साक्षान्निवासयितुमान्तरदेवदेवं
सङ्कल्पयामि विकचं हृदयारविन्दम् ॥२॥

आनील-नीरदविभा-वलयान्तराले,
विद्युत्कदम्बमिव धाम सहस्रदाम ।
नीहारिकां चिरचितां सहसाऽपसार्य,
स्थेयश्चकास्तु हृदयाम्बरपीठिकायाम् ॥३॥

दीप्तैः करैरुपरि दीप्तसहस्रशीर्षं
विष्वग्विसर्पिभिरुदारसहस्रबाहुम् ।
ऊर्ध्वाधरैः स्फुटसहस्रविलोचनाङ्घ्रिं,
ध्यायामि राममभिरामविराट्स्वरूपम् ॥४॥

शान्तेरधीश्वर ! सभाजयितुं भवन्तं
भक्तोपकल्पितमिदमान्तरपद्मपीठम् ।
सम्भूष्य विश्रमितुमर्हसि सानुकम्पं,
स्नेहोदबिन्दुभिरनञ्जि पदारविन्दम् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतानि पञ्च परिकल्प्य लघूपचारा-
न्स्तुत्वाऽऽचरामि मनसा वचसा सपर्याम् ।
अन्ते निवेद्य पदयोर्नतमुत्तमाङ्गं,
शारीरिकीमपचितिं च विभावयामि ॥६॥

दैव्यर्चना विकसितैरुडुभिः प्रवृत्ता,
भौतिक्यपि प्रचलिता प्रतिमासु भूयः ।
आध्यात्मिकी चिरमुदेतु ममाऽन्तरङ्गै,
निष्किञ्चनस्य किल काल्पनिकी सपर्या ॥७॥

मायामयीं जवनिकामनुभाव्य भूय-
श्छायामयी स्थितिरधिक्रियतां न तावत् ।
उन्मोच्य कञ्चुकमपावृतमात्मरूप-
मुन्मील्यतां स्मितसुधेक्षितमन्तरङ्गे ॥८॥

विश्वप्रभोरुपवने पवनेन धूता
नृत्यन्त्यलं सुमनसो मनसोऽनुरूपाः ।
आमोदयन्त्ववयवान्सकलान्विलासैः,
स्यात्कोरकोऽपि करयोश्चरणोपहारः ॥९॥

पट्टाभिराममविराममुपास्य रामं
ध्यायामि, यामि शरणं, मनसाऽर्हयामि ।
संसारपारसुलभाय शुभाय भूयः
पुष्पाञ्जलिं चरणयोः परिकल्पयामि ॥१०॥

——o——

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आधिभौतिककाण्डे—

(१) सङ्गीतिस्तवकः

जयत्यतिविकस्वर-द्युमणिवंशमुक्तामणिः
प्रपन्नजनतामनःपिटक-क्लृप्तचिन्तामणिः ।
विदेहनृपनन्दिनी-सुभगभावचूडामणिः
प्रभाविभवभासुरः सकललोकरक्षामणिः ॥१॥

जयत्यमरसुन्दरीनिकर-कर्णपूरीकृत-
प्रशस्तचरितस्तव-स्तवकमालयाऽलङ्कृतः ।
अमन्दमदमेदुर-प्रबलदुर्जनोत्तापक-
प्रतापतपनद्युतिः पुरुषपुङ्गवो राघवः ॥२॥

जयत्यखिलमेदिनीप्रगुणपुण्यबीजोद्भवः
पवित्रचरिताङ्कुरप्रकरविस्फुरत्पल्लवः ।
ककुत्स्थकुलगौरवोपवन-फुल्लकल्पद्रुमः
फलैर्हृदयकल्पितैः सपदि पूरयन्राघवः ॥३॥

जयत्यमरमन्दिरप्रसृत-कीर्तिगङ्गाम्बुभि-
श्चिरोत्कलिकयाऽऽकुलान्दिवि विनोदयन्पूर्वजान् ।
भुवं विदधदुज्ज्वलां विजयवैजयन्तीश्रिया
भगीरथपथाग्रणीर्दशरथात्मजग्रामणीः ॥४॥

जयत्यवधमण्डलं समुदयेन विद्योतयँ-
स्ततो भरतभूतलं महिमसम्पदा दीपयन् ।
अथाऽखिलवसुन्धरां सुयशसा समुद्भासयँ-
स्त्रिविक्रम इवापरो विजयराज्यलक्ष्मीपतिः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयत्युपरि वारिधेरुपनिधाय पादक्रमं
विमृज्य करकूर्चकैः कलुषलास्यमास्यं दिशाम् ।
चिरादुदयभूभृतः शिखरसौधमारूढवान्
किरन्नमृतचन्द्रिकां जगति रामचन्द्रः सदा ॥६॥

जयत्यभयसंयमप्रणयशान्ति-दीक्षागुरु-
र्महर्षिकविभारती-ललितनृत्यसङ्केतभूः ।
अखर्वरिपुमण्डल-प्रबलगर्वसर्वङ्कषः
समुद्ररसनां गुणैः प्रगुणयन्महापूरुषः ॥७॥

जयत्यकृतकप्रभासुरभि-भावनोज्जृम्भितः
समस्तककुभां तमःसमुदयं समुन्मूलयन् ।
महान्धतमसं नयन्खलजनान्दिवान्धोपमा-
न्सहस्रकिरणोज्ज्वलो रघुकुलोदितो भास्करः ॥८॥

जयत्ययमकृत्रिमस्त्रिजगतां प्रियो बान्धवः
समुद्धतनिशाचरद्विरद-माथकण्ठीरवः ।
अनन्तपथविस्फुरद्विजयतूर्यनादोत्सवः
समस्तजनसंस्तुत-प्रवरगौरवो राघवः ॥९॥

जयत्यमृतनिर्झरप्रणयिरामनामाङ्कितं
श्रितं विबुधमण्डलैः किमपि मेदिनीनन्दनम् ।
स्फुरन्ति महिमास्पदे यदवदानसन्तानके
विकासिसुमनोमनोनुगमनोद्धरा अङ्कराः ॥१०॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(२) सौन्दर्यस्तवकः

विशदनखमयूखश्रेणिभिः केसरालं,
दशदलमरुणाभं गर्भरेखाभिरामम् ।
अमृतमयसरय्वाः कूलकच्छे प्रफुल्लं,
रघुपतिपदपद्मं नित्यमुत्तंसयामि ॥१॥

सकलममलमङ्गं सद्म सौन्दर्यलक्ष्म्याः,
मुकुटघटितमौलिश्चन्द्रशाला विशाला ।
घनजघनयुतोरू यत्प्रतीहारवेद्यां,
कलशसुभगरम्भास्तम्भशोभां विधत्तः ॥२॥

हृदयविधृत-लोकव्यूह-रक्षाकपाट-
प्रतिममतिविशालं दुष्प्रधर्षं च वक्षः ।
द्रढयितुमिव बाहू लौहविष्कम्भभूतौ,
सततमभयदीक्षाबद्धकक्षौ विभातः ॥३॥

असुररुधिरधारावर्णकालेख्यपूर्णं,
प्रगुणगुणममोघं काण्डकोदण्डयुग्मम् ।
रघुपरिवृढदोष्णोरायसस्तम्भगुर्वोः
प्रथयति सविशेषां वीरशक्तेरभिख्याम् ॥४॥

उदितमवधभूमेर्भाग्यशैलस्य शृङ्गे,
रघुपतिमुखबिम्बं स्नेहपीयूषवर्षि ।
रदनमिषकलानां षोडशानां द्वयेन,
जयति कुमुदबन्धुं शारदं पार्वणं च ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अविरतमुपखेलत्खञ्जनोल्लासमञ्जू,
नयनकमलकोशावग्रभागे दधानाम् ।
विवरसुभगगर्भां दीर्घनासामृणालीं,
स्मितसरसि यदास्ये प्रोद्गतां भावयामि ॥६॥

मणिमुकुटमयूखैश्चित्रितानां कचानां
निचय उपरिचारी भाति नूनं तडित्वान् ।
वपुषि यदभिवृष्टाः स्फारसौन्दर्यधारा
अमृतरसपृषद्भिर्विश्वमाप्लावयन्ति ॥७॥

अमृतसरसि देहे दृग्विभङ्गास्तरङ्गा,
विकचकचकलापः सान्द्रशैवालजालम् ।
करचरणदृगास्यान्युत्पलानीव भान्ति,
भवदवपरितप्तान्प्रीणतो राघवस्य ॥८॥

विहितललितलीलः स्फारविद्युन्निभाभि-
र्मणिकनकविभूषाचित्रिताभिः प्रभाभिः ।
सुखयति ननु चेतश्चातकं राघवीयो
नवजलदसवर्णः प्रोज्ज्वलो देहवर्णः ॥९॥

कचततिरविमुक्तश्रीर्मुखं पुष्कराभं,
जघनममलकाञ्चीशोभि, दृष्टिर्विशाला ।
गतिरखिलमवन्ती, नर्मदा प्रेमवाणी,
द्रढयति रघुनाथं पुण्यतीर्थावतारम् ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(३) सद्गुणस्तवकः

साक्षाद्देवो भुवि जनयिता, तद्वचो वेदवाणी,
संसारश्रीस्तनुरपि तृणं, कामदोग्ध्री तदास्था ।
निष्कम्पोऽस्मिन्वचसि, पितरं मोचयन्सत्यपाशा-
त्प्रोष्यारण्ये शिखरमनयद्राघवस्तातभक्तिम् ॥१॥

राजद्वारे पथि च नटतो यौवराज्यप्रसङ्गे,
सोरस्ताडं बहु विलपतो विप्रवासे क्षणेन ।
सर्वाल्लोकानविषममुखज्येात्स्नयाऽऽप्याययन्तं
गाम्भीर्यश्रीरवृत हृदयेनोन्नतं रामचन्द्रम् ॥२॥

राष्ट्रं त्रातुं विनयति गुरौ, मातृषु व्याकुलासु,
पादोपान्ते पतति भरते, प्रार्थिनीषु प्रजासु ।
अङ्गीकृत्य स्थितिमजहतोऽरण्यवासप्रतिज्ञां
भेद्यं नाभूद्रघुकुलपतेः सत्यधर्मस्य वर्म ॥३॥

त्रातुं सीतामुटजनियतो लक्ष्मणः सार्थयायी,
दण्डारण्यं गहनविजनं काण्डकोदण्डमस्त्रम् ।
साहस्राणि क्षुभितजगतां रक्षसां स क्षणेन
धूलीचक्रे रघुपरिवृढो वीर्यपर्यायचर्यः ॥४॥

मुग्धा स्निग्धा चिरसहचरी, निर्जनः काननान्तः,
शीतो वातः कुसुमसुरभिर्गुञ्जितो भृङ्गगीतैः ।
गोदानद्या विपुलपुलिनं कौमुदीसिन्धुधौतं,
चैत्तं चित्रं रघुयुवमुनेरक्षतं ब्रह्मचर्यम् ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्षोवर्गं क्षपयति चमूं, शक्रजित्तीव्रशक्त्या
निश्चैतन्यं प्रियमनुजनिं शाययित्वा निजाङ्के ।
सञ्जीविन्या सपदि हिमवत्सम्बधयोज्जीवयन्तं
युद्धेऽप्युद्यद्व्यवसितममुं नात्यजद्धीरभावः ॥६॥

सापत्नाग्नौ हविरिव नवं जीवनं हावयित्वा
पश्चात्तप्तां भरतजननीं विप्रवासावसाने ।
दृग्भ्यां पीत्वा सपदि नमतः स्वप्रसूनिर्विशेषं
रामस्याग्रे क्षमितुमधिकं न क्षमाऽभूत्क्षमापि ॥७॥

एकं बीजं, सह निवसतिर्भोज्यमन्नं न भिन्नं
शिक्षा दीक्षा स्थितिरपि समा मूलतत्त्वानि तानि ।
इत्थं भ्रातृनविषमदृशा पश्यतः प्राणकल्पान्,
रामस्यात्मन्यनिशमुदिता सत्य सौभ्रात्रशोभा ॥८॥

हुत्वात्मानं विरहदहने, काममुद्भ्रम्य दूरं,
तीर्त्वा सिन्धुं, रणभुवि पराक्रम्य कृच्छ्रेण लब्धाम् ।
शुद्धां साध्वीं दृढमनुगतामप्यवद्यप्रवादा-
द्रामोऽत्याक्षीन्न पुनरखिलप्रीणनप्राणधर्मम् ॥९॥

पुष्पैर्वज्री भुवनमथनो मन्मथोऽधिज्यधन्वा,
प्राकाम्यं श्रीर्महितमहिलासङ्कुलं राजवेश्म ।
सेहे दास्यं जनकदुहितू राघवस्याक्षिलास्यं
भङ्गायाभून्न तु निमिषितश्चैकपत्नीव्रतस्य ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(४) महिमस्तवकः

भुवनमभितः सार्द्धं रोमोद्गमैर्य उदीर्यते,
कविरविऋषिः स्वच्छैर्गुच्छैर्गिरां यमपूपुजत्।
रघुकुलमणेरस्याऽऽलोकः सहैव विभूतिभि-
र्विमलमहिमादर्शे भूम्नाऽनुविम्ब्य विजृम्भते ॥१॥

हिमगिरिशिरो-लम्बप्रालम्बसन्निभगङ्गया
स्थलमपि जलप्रायं पूर्वश्चकार भगीरथः।
भरतवसुधास्निग्धापाङ्गायितायतसेतुना
स्थलमिव जलं सिन्धोश्चक्रे तदेष महारथः ॥२॥

जलदपटलैः सार्द्धं मल्लाहवैषिभिरूर्मिभि-
र्वरुणवलभीमाश्लिष्यद्भिर्जलैरपि माद्यतः।
उरसि जलधेः सेतोर्बन्धं विधाय फलेग्रहे
रघुकुलपतेरुत्साहश्रीश्चिरादभिनन्द्यते ॥३॥

उचितचरितैः शिष्टान्दुष्टाननुग्रहनिग्रहा-
वधिगमयतो रामस्याहो महान् महिमाऽद्भुतः।
प्रसृमरयशःस्रोतो रूक्षैर्वनैर्न विशोषितं,
ज्वलदनुपमं ज्योतिर्निर्वापितं न च सिन्धुना ॥४॥

द्विगुणिततपोवन्हौ हुत्वा शिरांसि हवींषि यः
प्रगुणितबलैर्दोर्भिः कैलासमप्युदतोलयत्।
तमपि शलभीकृत्य ज्वालाकरालशरानले,
व्यकिरदभितो रक्षाचूर्णं जगत्सु रघूद्वहः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असहमहसा येन मुष्टा दशापि दिशां धवा,
अहह ! सहसो वाष्पाम्भोभिस्तनूर्निरवापयन् ।
दशमुखममुं रौद्रं मल्लं प्रमथ्य रणाङ्गणे,
दशरथजनिर्ज्येष्ठः पृथ्वीं दिवोऽप्युदतोलयत् ॥६॥

अवधविधृताऽयोध्या, विप्रोषितः क्व नु राघवो,
जलधिपरिखा लङ्का विद्रावणः क्व च रावणः ।
विजयपटुतां प्राप्स्यल्लोकोत्तरोऽतिशयो न चे-
त्किमिति सहसाऽयास्यन्नाशं जगत्त्रयकण्टकः ॥७॥

रघुकुलपतेर्नित्यं सत्यव्रतं न पुनः पुरे,
परमतितरां घोरेऽरण्येऽणवेष्यनुपप्लवम् ।
सुरभितयशःपुष्पैर्यस्याऽर्चना नभसोऽप्यभू-
द्भ्रमदनलवत्तेजो नीराजनामुदभावयत् ॥८॥

श्रुतिसुखकलाधाम्ना साम्ना महाध्वनि-शोभने
प्रयतसरयूकूले स्वाराज्यसिद्धिविधित्सया ।
रघुकुलभुवा नीता ज्योतिष्मतीर्बहुभूमिका
अधिभुवि चिताः स्निग्धा लोकम्पृणाश्च गुणेष्टकाः ॥९॥

रघुपरिवृढज्योतिः प्रोन्मीलितं भुवनत्रये,
किमु भुवि गतं दण्डारण्यप्रमन्थसमुद्भवम् ।
उत जलनिधेर्भङ्गोद्भूतं वरिष्ठमविन्धनं,
किमुत तमसो भेदे प्रौढक्रियं दिवि विश्रुतम् ॥१०॥

———

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(५) अद्भुतस्तवकः

अमात्यानां प्रीत्या प्रकृतिकृतसत्यानुमतिभिः
परीष्टो यो राज्यश्रियमपि तृणीकृत्य विजहौ ।
स एवायं मायाकनकमृगमारादनुययौ,
वचोऽतीता चेतोगतिरतिविचित्रा रघुपतेः ॥१॥

अवध्नात्सुग्रीवे प्रणयमथ तत्प्रीणनकृते,
बलाच्चित्तेपाऽन्धे तमसि सहसा वालिनमपि ।
पुनः सीतान्वेषे त्वरयितुमुपालब्ध तमथो,
तमेवाग्रे चक्रे दशमुखवधेऽचिन्त्यचरितः ॥२॥

प्रियं बन्धुं मेने गुहमनुगतं गृद्धमपि यः,
सहायं यो वत्रे कपिकुलमरण्येषु विचरन् ।
अहो सोऽयं दुष्टद्विपकुलहरिः सर्वजगता-
मजय्यं लङ्केशं शलभमकरोदस्त्रदहने ॥३॥

य ईशानंमन्यस्त्रिभुवनमताप्सीद्दशमुखै-
र्दिगीशानां लक्ष्मीमदशदपजह्रे प्रियवधूम् ।
तमेतं विद्रोहज्वलितचरितं रावणमपि
पदं दिव्यं निन्ये रघुपतिरहो क्षान्तिगरिमा ॥४॥

यया कुक्षावङ्के हृदयरसमापाय्य विधृतो,
यया विद्वेषाग्नौ पललमिव संशोष्य मृदितः ।
इदं द्वैतं प्रेमप्लुततरलदृग्भ्यां समरसं,
पिबन्रामः कामं स्नपयति मनश्चित्रसरिति ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमुद्दिश्य भ्रंशो-नृपतिपदतोऽरण्यवसति-
र्द्वयं सापत्नाङ्को‌ऽभवदमुनाशङ्क्य भरतम् ।
उपेत्य प्राणान्स्वान्वनमनुगतं लक्ष्मणमपि
समस्नेहं द्रष्टुर्जगदतिगता भ्रातृपरता ॥६॥

यया घोरेऽरण्ये वसतिरपि नीता सरसतां,
यदर्थं निर्बन्धो जलधिदमने रावणवधे ।
प्रियामेतां सीतां सपदि विजहौ नीचवचना-
दहो चित्रं भूयो जनयति विभोस्त्यागगरिमा ॥७॥

प्रियां साध्वीं सीतां वनसहचरीं जीवितसमां
प्रजायाः कौलीनात्तृणमिव विहायाऽप्यचलतः ।
तदीयां सौवर्णीं प्रतिकृतिमुपादाय यजतोऽ-
नुतापोत्तप्तस्य त्रिभुवनविचित्रा प्रणयिता ॥८॥

चिरं राज्यभ्रष्टो विपिनवसतिः संयमधनो
मुनीनां शान्तानां तपांसि सहकृत्वा रघुवरः ।
अहंमन्यान्मध्यन्दिनगतललाटन्तप इव
प्रतापेनाक्रामन्नजनि ननु सोमाग्निशबलः ॥९॥

उपासीनः कृत्वा व्रतमृषिकुले, गृह्यनिरतो
वनेवासी, यायावरचरित इक्ष्वाकुकुलभूः ।
श्रुतिं रक्षन्भूभृद्दृढतरहृदाऽऽकर्षणपरः
सतां सेवासक्तोऽभवदखिलवर्णाश्रमकृतिः ॥१०॥

—०—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) गौरवस्तवकः

अहो रघुपतेर्महामहिमसम्पदावर्तितै-
रहोभिरिह मादृशैर्गणयितुं कथं पार्यते ।
अशेषभुवनस्थितौ कृतधियोऽपि वाचंयमा,
विशेषयतु केवलं स किल शेष एवाऽर्थतः ॥१॥

जनिर्दिनकराङ्कुरायितरुचां रघूणां कुले,
विवृद्धिरमलैर्जलैर्विलुलिते-सरय्वास्तटे ।
समृद्धिरुदधेः परागपि पराक्रमैः स्थापिता,
खनिर्महिमसम्पदः कथमशेषमुद्घाट्यते ॥२॥

द्वौ जगति तौ भुजौ, विदलिता भुजा विंशति-
र्द्वौ शौ विकसिते च ते, तिमिरिता दृशो द्वे दश ।
तदेव मुखमुन्मुखं, दश मुखान्यवाञ्चि क्षितौ,
शिरोधिरपि सोन्नता, दश शिरोधयो न्यक्कृताः ॥३॥

सलीलममरावती किल निराकृताऽयोध्यया,
वहन्ति बहुनन्दनान्युपवनानि यत्र श्रियम् ।
प्रजाः सुमनसः प्रतिष्ठितपदं सुधर्मासने
महेन्द्रमवनेरमुं परिचरन्ति भक्त्युन्मुखाः ॥४॥

भवन्तु धरणीतले शतसहस्रशो भूभुज-
श्चिरं भवति भारती क्षितिरनेन राजन्वती ।
यथा स्फुरति सर्वतो जगति रामराज्यप्रथा,
तथा श्रुतिपथं परा विशति नैव रोचिष्मती ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अधोभुवनमाददे समुचिताभिधानं पदं,
द्युलोक उदगादहो अवधसम्पदा न्यक्कृतः ।
परं नभसि लाघवात्त्रिदशवास उड्डीयते
सहस्रमपि चक्षुषां विनतमद्भुते पार्थिवे ॥६॥

अमुष्य धरणीभृतो महिमनिर्झराभ्युच्चया-
त्प्रहृष्य सरयूरसौ ललितनृत्यचर्यापरा ।
पुराकृति-जयध्वनेः कलकलं कलं कुर्वती
प्रवर्तयति कीर्तनागुणनिकां समुद्रावधि ॥७॥

प्रभाकरचिरप्रभासुभग-वंशमुक्तामणे-
रमुष्य महनीयता रुचिरवृत्तताऽनर्घता ।
महीहृदयसाक्षिकं सुविदितापि, तद्वेदनं
पुनःपुनरुदीर्यतेऽपचितिशङ्खघण्टारवैः ॥८॥

चिरेण निगमागमानुगमवर्त्म कीर्णं तृणैः,
सदाचरणदीपिका निकृतिभूमधूमाकुला ।
निरन्तरमुदीरितः प्रतिपदं स्खलद्भिर्जनैः
पुरो नयति केवलं मधुररामरामध्वनिः ॥९॥

न केवलमिदंविधं रघुपतेः परं गौरवं,
निगूह्य चिरसञ्चितं ननु भुवोपि तद्वैभवम् ।
प्रदीपनिभया धिया सदसतां विवेके पटून्
विकर्षति दवीयसोऽप्यभिमुखं तदीया प्रभा ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(७) सौराज्यस्तवकः

स्वाराज्ये सुरपन्थिनां विरागो,
नेदीयोऽहिभयमधस्तलाधिराज्ये ।
वैराज्ये विषयभुजां तटस्थभावः,
शान्तिश्रीः सकलसुखाय रामराज्ये ॥१॥

निर्बाधाः श्रुतिविधयः समृद्धिमापुः
पर्याप्तं स्मृतिसरितो जनान्ममार्जुः ।
पौराण्यो भणितय आद्रताः शिरोभिः
स्वाचारा अपि परिचर्चिताः प्रजाभिः ॥२॥

वर्णानां स्थितिगतिभिः सहाऽऽश्रमाणां
सद्धर्मा जगति यथायथं विविक्ताः ।
व्याचक्रुः प्रगतिबलं चिरप्ररूढं,
सोपानं त्रिदिवपथस्य येन पूर्णम् ॥३॥

सन्न्यायध्वजमवलम्ब्य विस्फुरन्ती
निर्बाधं दिशि दिशि धर्मवैजयन्ती ।
तन्वाना निरुपमसत्यनित्यशोभां
निःशेषं जगति रजस्तमोऽप्यमार्जीत् ॥४॥

राजानं जनकमिव, प्रजाः प्रजावत्,
सद्भावैः सममुभये विभावयन्तः ।
अन्योन्यप्रतिफलितोज्ज्वलानुरागा
द्वैगुण्यश्रियमवभासयाम्बभूवुः ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूभर्तुर्व्रतमनुरञ्जनं जनानां
तेषां तत्प्रियहितकृद्बभूव यत्नः ।
अज्ञानामुपचय इष्यते मुखेन,
तेषां तत्सुखपरिपूर्तये प्रवृत्तिः ॥६॥

ऐकात्म्यं प्रकृतिजनस्य भूपतेश्च
व्याचक्रे जगति परस्परानुबन्धः ।
यस्माद्दृढ्करचरणाद्यनन्तभावं
पश्यद्भिर्नृपतिरमानि विश्वरूपः ॥७॥

येा लाभेा लघु लघु भावितः प्रजाभ्य-
स्तेनैवाविरतमिमाः समृद्धिमीयुः ।
आदित्यः करविधृतं रसं पृथिव्या-
स्तत्पुष्ट्यै पुनरभिवर्षति प्रकामम् ॥८॥

सौराज्योदयरुचिभिः प्रसाधितायाः
शेाभाऽभून्मधुरतरा वसुन्धरायाः ।
पश्यन्तः प्रगतिमवाङ्मुखा दिविस्थाः,
पातालप्रकृतय उन्मुखा बभूवुः ॥९॥

ईतीनां विहतिरनुत्पथा समृद्धि-
र्निर्बाधा स्थितिरनपायिनी विवृद्धिः ।
आदर्शासनमधिशाय्य राज्यलक्ष्मीं
व्यातेनुर्निरवधि रामराज्यगीतीः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(८) यशःस्तवकः

महेन्द्रमणिशैलभू-भरतभू-जयस्तम्भव-
द्रघुपुङ्गवोन्नतं रघुपतेर्गजेन्द्राकृतेः ।
विशिष्य यदभूषयन्प्रतिदिशं विसर्पद्रुचः
सुवर्णगुणगुम्फिता विमलकीर्तिमुक्तास्रजः ॥१॥

करालकलिकालना-पटहवाद्यनादानुगा
निरन्तरकरम्बितप्रणयिहार्दतन्त्रीरवाः ।
प्रफुल्लनयनस्रवज्जलतरङ्गसंवर्द्धिता
जयन्ति विजयोज्ज्वला रघुपतेर्यशोगीतयः ॥२॥

भवप्रमदकानने यदवदानवेद्यां चिरा-
द्विरुह्य धृतकोरकाः स्तवकिताश्च कीर्त्यङ्कुराः ।
तुषारकणिकाश्चितैर्मृदुतरैः परागैः सदाऽ-
धिवास्य मुखमारुतं सुरभयन्ति भूमण्डलम् ॥३॥

बलाहकदलोदिता किमु नवा बलाकावली,
समुद्रहृदयोत्थिता किमु नवीनफेनच्छटा ।
किमु द्रुमसमुच्चये विकसिता लतासन्तति-
र्महीतलहरिन्मणेः प्रसृमरा यशःसंहतिः ॥४॥

अभावमघसंहतेर्विदधती जगद्वल्लभा
स्वभावमधुराकृतिर्गुणनिकागुणैर्दीप्रभाः ।
प्रभावशुभगीतिभिः सुमनसामनेकाः सभाः
सभाजयति भूतले दिवि च रामचन्द्रप्रभा ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगाधमहिमोदधेरुदरसम्पुटेभ्यः स्फुटाः
प्रतापतपनप्रभाकनकसूत्रसन्दानिताः ।
समस्तजनताहृदाभरणतारहारायिताः
स्फुरन्ति रघुसन्ततेर्जगति कीर्तिमुक्तोत्कराः ॥६॥

अनेन धरणीभृता दृढनिबद्धसीम्नश्रिरा-
द्यशोमयपयोनिधेः कतिपयैः शुभैर्बिन्दुभिः ।
विशोध्य बहु सस्पृहं गुणमयं शरीरं निजं
जयन्त्यखिलखेचरान्नभसि राजहंसाः श्रिया ॥७॥

हिमोपहितचन्दनद्रवविलेपमोदावहा
विषाक्तविषयोन्मिषत्त्रिविधतीव्रतापापहा ।
विसृत्वरयशोमयी नवसुधा सुधांशोर्भुवः
पिपर्ति मृगतृष्णिकामपि भवाध्वनो धन्वनि ॥८॥

अहर्निशमुदित्वरीं मधुरया श्रिया जित्वरीं
विभाव्य गततन्द्रिकां रघुपतेर्यशश्चन्द्रिकाम् ।
दिवा बहु विलज्जते, मुखमनुज्ज्वलं गूहते,
प्रभाऽधिभुवि कौमुदी दिवि च शारदी कौमुदी ॥९॥

सुधामधुरिमाधरीकरणधैर्यधन्या रसे,
शरद्विशदकौमुदीमदविमर्ददक्षा रुचौ ।
प्रतिक्षणमहागुणानुरणनप्रवीणा ध्वनौ,
धराधरशिरोमणेः परचिता यशोनिर्झराः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(६) कल्पनास्तवकः

स्मेरयति कालचक्रं
नर्तयितुर्विश्वकर्मणः शिल्पम् ।
श्वेताज्योतिः कणिका
भ्रमयत्यद्यापि धीरनयनानि ॥१॥

उद्गच्छन्नेव बला-
द्विमृद्य दूरं वने परिक्षिप्तः ।
दिष्ट्या कुलाङ्कुरोऽसौ
रूढो वितताम मञ्जरी रुचिराः ॥२॥

मधुमधुरं प्रेमरसं
पुरो निपाय्य प्रलोभितो मदनः ।
संयम्य वनव्रतिना
निगृहीतः शिक्षितश्च चापल्ये ॥३॥

अवधभुवो रविबिम्बं
मिथिलायाः प्रेमजीवनज्योतिः ।
दुर्दैवतिमिराकीर्णं
बभ्राम चिराय दण्डकारण्ये ॥४॥

आघ्रातं परिलीढं
विचुम्बितं पाणिपीडितं कपिभिः ।
सुजनैः शिरःसु विधृतं
किञ्चन चरणाम्बुजं जगज्जयति ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिन्धोर्वक्षसि सेतु-
स्तदुपरि दूरोच्छ्रितो यशःकेतुः ।
यः कर्बुरैस्तु धूम्रः,
शुद्धै रक्तैः समुज्ज्वलो दृष्टः ॥६॥

प्रोतानि येन सहसा
शरसूच्या दश शिरांसि निर्भिद्य ।
भक्तप्रियः कपाली
प्रतोषितो मुण्डमालयाऽनेन ॥७॥

भ्रान्तिं दधावरण्ये
पुण्यजनान्भावयन्नपुण्यजनान् ।
शान्तः पुण्यजनेशः
पुण्यजनेशं विभीषणं चक्रे ॥८॥

शान्तमविकारकान्तं,
तथाऽप्यतिक्रान्तसर्वदुर्दान्तम् ।
आलोकयन्त लोकाः
कञ्चन दूरादलौकिकालोकम् ॥९॥

विश्वपतेः प्रमदवने
पञ्चाङ्गाः शाखिनः सहस्राणि ।
सप्ताङ्गैर्महनीयः
कल्पतरुः कोऽपि सौरभं तनुते ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

(१०) रसस्तवकः

लिग्धेङ्गितेत नयने वदनं स्मितेन,
स्पर्शेन रोमविवरण्यमृते निमज्य ।
पाणिग्रहे द्रवयतो जनकाङ्गजातां,
प्रेमाङ्कुरः स्तवकितो रघुनन्दनस्य ॥१॥

मुग्धां वधूं नवसमागमनर्मवामां,
रामं किशोरवयसा मृदुलाभिरामम् ।
आलोक्य लोकहृदयाङ्कनलब्धकीर्ति-
र्मन्दं जहास मदनोऽवसरं परीप्सुः ॥२॥

वाष्पप्लुतानि नयनान्यभितो जनानां,
संभावयन्मधुरमुग्धविलोकितेन ।
विप्रोषितो हतविधेर्घटनाद्धनाय,
रामश्चकार परितः करुणावतारम् ॥३॥

उद्दण्डदूषणखरदूषणमन्थचण्ड-
कोदण्डताण्डवविसृत्वरकाण्डवृष्ट्या ।
निष्कण्टकस्थितिकृतो रघुवंशकेतो,
रौद्रः प्रताप उपमानमपाचकार ॥४॥

प्रत्यर्थिदर्पदमनाय निबद्ध्य सेतुं,
करुङ्यनं शमयितुं भुजबद्धदृष्टेः ।
उत्साहसाहसनिधे रघुनायकस्य,
लोकैरगीयत जगज्जयिबलवीरचर्या ॥५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रामस्य शस्त्रनिकरैः परिपीड्यमानो,
रक्षोगणो दशसु दिक्षु पलायमानः ।
हातातमातरुदितैरुदितैश्च घोरैः,
प्राकम्पयद्दश दिशोऽपि भयेन भूयः ॥६॥

युद्धक्षणक्षपितराक्षसलक्षवक्षः
क्षोभोद्भवक्षतजमांसवसाविलेपैः ।
लङ्कां श्मशानमिव विस्तृतनुं विधाय,
बीभत्सदृश्यमभितो वितताम वीरः ॥७॥

वासो वनेऽतिगहने, कपयः सहायाः,
पारेर्णवं रिपुरतिप्रबलस्तथापि ।
रामं सराममुदितं दृढविक्रमेण,
दृग्भ्यां निपीय भृशमुत्स्मयते स्म लोकः ॥८॥

सीतां प्रियामपि निरस्य जनापवादा-
त्संसारमाकलयतो नितरामसारम् ।
निर्वेदमग्नमनसो रघुपुङ्गवस्य,
शुद्धेऽन्तरात्मनि चिरं विरराज शान्तिः ॥९॥

नानारसोज्ज्वलमहामहिमावदानै-
रादर्शचित्रचयमङ्कयतः पृथिव्याम् ।
श्रीराघवस्य जगदुज्ज्वलपादपीठे,
पुष्पाञ्जलिं विरसमीदृशमर्पयामि ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तिस्थानम्—

सोमनाथ शर्मा,

हेड पण्डित,

ठमेल, नेपाल.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu